# Ganga Stotram

# गङ्गास्तोत्रम् १०

## Document Information

Text title : Ganga Stotram

File name : gangAstotram10.itx

Category : devii, devI, nadI, brahmavaivartapurANa, stotra

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : brahmavaivartapurANa | prakRRitikhaNDa | adhyAya 10/97-107||

Latest update : March 5, 2025

Send corrections to : sanskrit at cheerful dot c om


This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.


March 5, 2025

*sanskritdocuments.org*

# गङ्गास्तोत्रम् १०

श्वेतचम्पकवर्णाभां गङ्गां पापप्रणाशिनीम् ।
कृष्णविग्रहसम्भूतां कृष्णतुल्यां परां सतीम् ॥ ९७॥

वह्निशुद्धांशुकाधानां रत्नभूषणभूषिताम् ।
शरत्पूर्णेन्दुशतकप्रभाजुष्टकलेवराम् ॥ ९८॥

ईषद्धासप्रसन्नास्यां शश्वत्सुस्थिरयौवनाम् ।
नारायणप्रियां शान्तां सत्सौभाग्यसमन्विताम् ॥ ९९॥

बिभ्रतीं कबरीभारं मालतीमाल्यसंयुताम् ।
सिन्दूरबिन्दुललितां सार्द्धं चन्दनबिन्दुभिः ॥ १००॥

कस्तूरीपत्रकं गण्डे नानाचित्रसमन्वितम् ।
पक्वबिम्बसमानैकचार्वोष्ठपुटमुत्तमम् ॥ १०१॥

मुक्तापङ्क्तिप्रभाजुष्टदन्तपङ्क्तिमनोहराम् ।
सुचारुवक्त्रनयनां सकटाक्षमनोरमाम् ॥ १०२॥

कठिनं श्रीफलाकारं स्तनयुग्मं च बिभ्रतीम् ।
बृहच्छ्रोणीं सुकठिनां रम्भास्तम्भपरिष्कृताम् ॥ १०३॥

स्थलपद्मप्रभाजुष्टपादपद्मयुगन्धराम् ।
रत्नाभरणसंयुक्तं कुङ्कुमाक्तं सयावकम् ॥ १०४॥

देवेन्द्रमौलिमन्दारमकरन्दकणारुणम् ।
सुरसिद्धमुनीन्द्रादिदत्तार्घ्यैस्संयुतं सदा ॥ १०५॥

तपस्विमौलिनिकरभ्रमरश्रेणिसंयुतम् ।
मुक्तिप्रदं मुमुक्षूणां कामिनां स्वर्गभोगदम् ॥ १०६॥

वरां वरेण्यां वरदां भक्तानुग्रहकातराम् ।
श्रीविष्णोः पददात्रीं च भजे विष्णुपदीं सतीम् ॥ १०७॥

इति ब्रह्मवैवर्तपुराणे प्रकृतिखण्डे दशमाध्यायान्तर्गतं
गङ्गास्तोत्रं समाप्तम् ।

ब्रह्मवैवर्तपुराण । प्रकृतिखण्ड । अध्याय १०/९७-१०७॥

brahmavaivartapurANa . prakRRitikhaNDa . adhyAya 10/97-107..

Proofread by PSA Easwaran

*Ganga Stotram*

pdf was typeset on March 5, 2025

Please send corrections to *sanskrit@cheerful.com*